# shrIvenkaTeshapa nchakastotram

# શ્રીવેઙ્કટેશપઞ્ચકસ્તોત્રમ્

## Document Information

Text title : shrIveMkaTeshapanchakastotram

File name : veMkaTeshapanchakastotram.itx

Category : panchaka, vishhnu, venkateshwara, stotra, vishnu

Location : doc_vishhnu

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : Venkatesha Kavyakalapa

Latest update : December 19, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીવેઙ્કટેશપઞ્ચકસ્તોત્રમ્

શ્રીધરાધિનાયકં શ્રિતાપવર્ગદાયકં
શ્રીગિરીશમિત્રમમ્બુજેક્ષણં વિચક્ષણમ્ ।
શ્રીનિવાસમાદિદેવમક્ષરં પરાત્પરં
નાગરાઙ્ગિરીશ્વરં નમામિ વેઙ્કટેશ્વરમ્ ॥ ૧॥

ઉપેન્દ્રમિન્દુશેખરારવિન્દજામરેન્દ્ર
વૃન્દારકાદિસેવ્યમાનપાદપઙ્કજદ્વયમ્ ।
ચન્દ્રસૂર્યલોચનં મહેન્દ્રનીલસન્નિભમ્
નાગરાઙ્ગિરીશ્વરં નમામિ વેઙ્કટેશ્વરમ્ ॥ ૨॥

નન્દગોપનન્દનં સનન્દનાદિવન્દિતં
કુન્દકુટ્મલાગ્રદન્તમિન્દિરામનોહરમ્ ।
નન્દકારવિન્દશઙ્ખચક્રશાર્ઙ્ગસાધનં
નાગરાઙ્ગિરીશ્વરં નમામિ વેઙ્કટેશ્વરમ્ ॥ ૩॥

નાગરાજપાલનં ભોગિનાથશાયિનં
નાગવૈરિગામિનં નગારિશત્રુસૂદનમ્ ।
નાગભૂષણાર્ચિતં સુદર્શનાદ્યુદાયુધં
નાગરાઙ્ગિરીશ્વરં નમામિ વેઙ્કટેશ્વરમ્ ॥ ૪॥

તારહીરક્ષીરશાર [તારહીરશાર] દાભ્રતારકેશકીર્તિ [સં]
વિહાર [હારહાર] માદિમધ્ય્ [મ] આન્તશૂન્યમવ્યયમ્ ।
તારકાસુરાટવીકુઠારમદ્વિતીયકં
નાગરાઙ્ગિરીશ્વરં નમામિ વેઙ્કટેશ્વરમ્ ॥ ૫॥

॥ ઇતિ શ્રીવેઙ્કટેશ્વરપઞ્ચકસ્તોત્રં સમ્પૂર્ણમ્ ॥

॥ શ્રીવેઙ્કટેશ્વરાર્પણમસ્તુ ॥
॥ શ્રીરસ્તુ ॥

From a telugu book veNkaTeshakAvyakalApa
Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

---

*shrIvenkaTeshapa nchakastotram*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*